# श्रीसुरसरस्वतीसभा शृङ्गेरि

## तुरीया परीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 31-08-2025 　　　　　　　　　　　　　　　　　　　　अङ्काः - 100

पूर्वाह्ने – 10:00 वादनतः 1:00 वादनपर्यन्तम् 　　　　　　　　　　समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1 　पञ्चानाम् एकवाक्येन उत्तरं लिखत ।** 　　**5**

१. कः शरद्घनं न अर्दति?

२. आयुषः अर्धं कुत्र गच्छति?

३. कस्य अवाप्तव्यं किञ्चन न विद्यते?

४. श्रीसच्चिदानन्दभारतीमहास्वामिनां काले श्रीमठीयास्थानविद्वांसः के?

५. भुजिष्यायां जातः पारशवः कः?

६. श्रीशङ्कराचार्याणां स्वशाखागता उपनिषत् का?

७. शतानीकस्य मन्त्रिणः नाम किम्?

८. देवानां सभायाः नाम किम्?

**2 　पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** 　　**10**

१. शिवगुरुः पुत्रजन्मोत्सवं कथम् अकरोत्?

२. भगवतः सप्तत्वसम्बन्धं विशदयत ।

३. परोपकारिणां स्वभावः कः?

४. शृङ्गगिरौ शङ्करः किमपश्यत्? तेन स किमचिन्तयत्?

५. रघौ नाथे प्रजानाम् अशुभं नेत्यत्र दृष्टान्तः कः?

६. पुत्रीयन् पाण्डुः कुन्तीं किमवोचत्?

७. मृगावतीं तुण्डेनादायोड्डीयानो गरुडः किमकरोत्?

**3 द्वयोः विस्तरेण (सप्ताष्टैर्वाक्यैः) उत्तरं लिखत ।** **8**

१. वाल्मीकिकृतचन्द्रोदयं वर्णयत ।

२. नलेन हंसग्रहणस्य वृत्तान्तं वर्णयत ।

३. भगवता वेदव्यासेन उक्तो द्रौपद्याः पूर्ववृत्तान्तो वर्ण्यताम् ।

४. पुत्रीयता पाण्डुना साश्रु उक्ता कुन्ती दुर्वासःसेवावृत्तान्तं किमिति अवर्णयत्?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. मयि घोषवती नाम वीणास्ति ।

२. आवयोः साङ्ग्रामिकमुपकरणं सम्पादय ।

३. ग्रहाणां गतिरधुना प्रतिकूला नो दृश्यते ।

४. शीर्षेऽस्य व्यरचि रयेण पुष्पवृष्टिः ।

५. त्वमस्माकं दूतो भवन् साहाय्यं कर्तुमर्हसि ।

**5 द्वयोः भावं विशदयत ।** **8**

१. श्रीमान् मुदा शुभतमेऽहनि चारुनाम चक्रे पिता सपदि शङ्कर इत्यमुष्य ।
अन्वर्थनाम भुवि शङ्करणेन यद्वा शं सर्वदा करवशं ध्रुवमस्य भावि ॥

२. यदमोघमपामन्तरुप्तं बीजमज त्वया ।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ॥

३. अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।
कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥

४. स्थितः ककुद्मानिव तीक्ष्णशृङ्गो महाचलः श्वेत इवोच्चशृङ्गः ।
हस्तीव जाम्बूनदबद्धशृङ्गो रराज चन्द्रः परिपूर्णशृङ्गः ॥

**6 श्लोकमेकं पूर्णं लिखत ।** **4**

१. यः प्रीणयेत् .................. लभन्ते ॥

२. आयुः .................. प्राणिनाम् ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत ।** **4**

१. कालिदासः २. लक्ष्मणशास्त्री

**8 एकस्य लघुटिप्पणीं लिखत ।** **4**

१. रघोः औदार्यम् २. दुर्योधनस्य शाठ्यम्

**9 चत्वारि पदानि वाक्ये योजयत ।** **4**

१. अवेहि २. भङ्ग्या ३. देशिकेन्द्रः
४. क्रव्यादाय ५. त्रिलोक्याम् ६. विरूपाक्षः

**10 चतुर्णां रूपाणि विवेचयत ।** 4

१. लक्ष्यीकृत्य २. विशुद्धचेताः ३. उपह्वरे
४. लक्ष्मीम् ५. जगाद ६. इदम्

**11 चतुर्णां पर्यायपदानि लिखत ।** **4**

१. स्तोकम् २. सप्तार्चिः ३. पुष्करः
४. शरव्यः ५. तुण्डम् ६. शक्रः

**12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** **4**

१. यथाकालम् २. मानधनम् ३. गिरिनामा
४. इन्द्राग्नियमवरुणाः ५. स्तनन्धयः ६. भुवनगुरुः

**13 चतुर्णां सन्धिं विभज्य नाम लिखत ।** **4**

१. इत्यादिदेश २. सम्भूयैकम् ३. पञ्चभिर्भ्रातृभिः
४ अधीयन्नर्जुनः ५. वसंश्चतुर्थोऽग्निः ६. मद्वाक्यम्

**14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** **6**

१. स्याम् २. ववन्दे ३. आहर ४. अकरोत्

**15 द्वयोः व्याकरणविशेषं लिखत ।** **4**

१. पाराशर्यः २. मा भैषीः ३. व्यजयत ४. अर्घ्यम्

**16 समासमेकं सलक्षणं विशदयत ।** **4**

१. अव्ययीभावसमासः २. तत्पुरुषसमासः

**17 चतुर्थं पदं लिखत ।** **4**

| | | | | | |
|---|---|---|---|---|---|
| १. | भर्तृहरिः | – नीतिशतकम् | :: | लक्ष्मणसूरिः | – ________ |
| २. | आर्याम्बा | – शिवगुरुः | :: | माद्री | – ________ |
| ३. | क्षत्ता | – विदुरः | :: | अजातशत्रुः | – ________ |
| ४. | कुसुमकोमलम् | – कर्मधारयः | :: | चक्षुःश्रोत्रम् | – ________ |

**18 इतरवचनानि लिखत ।** **4**

| | | | |
|---|---|---|---|
| १. | ______ | ______ | करवाम । |
| २. | कवचिनः | ______ | ______ । |
| ३. | ______ | बभूवतुः | ______ । |
| ४. | चतुष्पात् | ______ | ______ । |

**19 रिक्तस्थानानि पूरयत ।** **4**

१. गिरिः __________ अक्षय्यकृपाकटाक्षवीक्षापात्रीभूत आसीत् ।

२. भोः कुमाराः! पश्यत मे __________ ।

३. भो राजन्! मा मां __________ ।

४. वागीशं वाग्भिरर्थ्याभिः ________ उपतस्थिरे ।

**20 प्रयोगपरिवर्तनं कुरुत ।** **2**

१. अस्माभिः का इयं सुन्दरी दृश्यते?

२. त्वम् आत्मगुणानुरूपं पुत्रं लभस्व ।

------------------------